# 10. जटायोः शौर्यम्

## अभ्यासः

**प्रश्नः 1. एकपदेन उत्तरं लिखत**
(क) आयतलोचना का अस्ति?
(ख) सा कं ददर्श?
(ग) खगोत्तमः कीदृशीं गिरं व्याजहार?
(घ) जटायुः काभ्यां रावणस्य गात्रे व्रणं चकार?
(ङ) अरिन्दमः खगाधिपः कति बाहून् व्यपाहरत्?

**उत्तर:**
(क) सीता
(ख) जटायुम् / गृध्रम्।
(ग) शुभाम्
(घ) तीक्ष्णनखाभ्याम्
(ङ) दश

**प्रश्नः 2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क) "जटायो! पश्य" इति का वदति?
(ख) जटायुः रावणं किं कथयति?
(ग) क्रोधवशात् रावणः किं कर्तुम् उद्यतः अभवत्?
(घ) पतगेश्वरः रावणस्य कीदृशं चापं सशरं बभञ्ज?
(ङ) जटायुः केन वामबाहु दंशति?

**उत्तर:**
(क) "जटायो! पश्य" इति वैदेही (सीता) वदति।
(ख) जटायुः रावणं कथयति यत् परस्त्रीस्पर्शात् नीचां मतिं निवर्तय धीरः तत् न समाचरेत् यत् अस्य परः विर्गहयेत्।
(ग) क्रोधवशात् रावणः वैदेहीं वामेन अङ्केन संपरिष्वज्य जटायुं तलेन आशु अभिजघान।
(घ) पतगेश्वरः रावणस्य मुक्तामणिविभूषितम् चापं सशरं बभञ्ज।
(ङ) जटायुः तुण्डेन वामबाहु दंशति।

**प्रश्न 3. उदाहरणमनुसृत्य णिनि-प्रत्ययप्रयोगं कृत्वा पदानि रचयत**
यथा- गुण + णिनि — गुणिन् (गुणी)
दान + णिनि — दानिन् (दानी)

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(क) कवच + णिनि — ..............
(ख) शर + णिनि — ..............
(ग) कुशल + णिनि — ..............
(घ) धन + णिनि — ..............
(ङ) दण्ड + णिनि — ..............

**उत्तरः**
(क) कवच + णिनि — कवचिन् (कवची)
(ख) शर + णिनि — शरिन् (शरी)
(ग) कुशल + णिनि — कुशलिन् (कुशली)
(घ) धन + णिनि — धनिन् (धनी)
(ङ) दण्ड + णिनि — दण्डिन् (दण्डी)

**(अ) रावणस्य जटायोश्च विशेषणानि सम्मिलितरूपेण लिखितानि तानि पृथक्-पृथक् कृत्वा लिखत**

युवा, सशरः, वृद्धः, हताश्वः, महाबलः, पतगसत्तमः, भग्नधन्वा, महागृध्रः, खगाधिपः, क्रोधमूच्छितः, पतगेश्वरः, सरथः, कवची, शरी

**यथा —**
रावणः — जटायुः
युवा — वृद्धः
.............. ............
.............. ............

**उत्तरः**

| रावणः | जटायुः |
|---|---|
| युवा | वृद्धः |
| सरथः | महाबलः |
| हताश्वः | पतगसत्तमः |
| भग्नधन्वा | महागृध्रः |
| क्रोधमूर्च्छितः | खगाधिपः |
| सशरः | पतगेश्वरः |
| कवची, शरी | |

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**प्रश्न: 4. 'क' स्तम्भे लिखितानां पदानां पर्यायाः 'ख' स्तम्भे लिखिताः। तान् यथासमक्षं योजयत-**

'क' — 'ख'
कवची — अपतत्
आशु — पक्षिश्रेष्ठः
विरथः — पृथिव्याम्
पपात — कवचधारी
भुवि — शीघ्रम्
पतगसत्तमः — रथविहीनः

**उत्तर:**
'क' स्तम्भ — 'ख' स्तम्भ
कवची — कवचधार
आशु — शीघ्रम्
विरथः — रथविहीनः
पपात — अपतत्
भुवि — पृथिव्याम्
पतगसत्तमः — पक्षिश्रेष्ठः

**प्रश्न: 5. अधोलिखितानां पदानां/विलोमपदानि मञ्जूषायां दत्तेषु पदेषु चित्वा यथासमक्षं लिखत**

मन्दम् पुण्यकर्मणा हसन्ती अनार्य अनतिक्रम्य देवेन्द्रेण प्रशंसेत् दक्षिणेन युवा
पदानि — विलोमशब्दाः

(क) विलपन्ती — ...............
(ख) आर्य — ...............
(ग) राक्षसेन्द्रेण — ...............
(घ) पापकर्मणा — ...............
(ङ) क्षिप्रम् — ...............
(च) विगर्हयेत् — ...............
(छ) वृद्धः — ...............
(ज) वामेन — ...............
(झ) अतिक्रम्य — ...............

Get More Learning Materials Here : CLICK HERE www.studentbro.in

**उत्तर:**
पदानि — विलोमशब्दाः
(क) विलपन्ती — हसन्ती
(ख) आर्य — अनार्य
(ग) राक्षसेन्द्रेण — देवेन्द्रेण
(घ) पापकर्मणा — पुण्यकर्मणा
(ङ) क्षिप्रम् — मन्दम्
(च) विगर्हयेत् — प्रशंसेत्
(छ) वृद्धः — युवा
(ज) वामेन — दक्षिणेन
(झ) अतिक्रम्य — अनतिक्रम्य

**प्रश्नः 6. (अ) अधोलिखितानि विशेषणपदानि प्रयुज्य संस्कृतवाक्यानि रचयत**
(क) शुभाम् — .................
(ख) खगाधिपः — .................
(ग) हतसारथिः — .................
(घ) वामेन — .................
(ङ) कवची — .................

**उत्तर:**
(क) शुभाम्- वृक्षे स्थितः जटायुः रावणं शुभाम् गिरम् अकथयत्।
(ख) खगाधिपः- खगाधिपः जटायुः विलपन्ती वैदेहीं अपश्यत्।
(ग) हतसारथिः- हतसारथिः रावणः भूमौ अपतत्।
(घ) वामेन- वामेन हस्तेन दानं न करणीयम्।
(ङ) कवची- रावणः कवची शरी च आसीत्।

**(आ) उदाहरणमनुसृत्य समस्त पद रचयत**
यथा- त्रयाणां लोकानां समाहारः — त्रिलोकी
(क) पञ्चानां वटानां समाहारः — ..............
(ख) सप्तानां पदानां समाहारः — ..............
(ग) अष्टानां भुजानां समाहारः — ..............
(घ) चतुर्णां मुखानां समाहारः — ..............

**उत्तर:**
समास विग्रह — समस्त पद
(क) पञ्चानां वटानां समाहारः — पञ्चवटी
(ख) सप्तानां पदानां समाहारः — सप्तपदी

Get More Learning Materials Here : CLICK HERE www.studentbro.in

(ग) अष्टानां भुजानां समाहारः — अष्टभुजम्
(घ) चतुर्णा मुखानां समाहारः — चतुर्मुखम्

Get More Learning Materials Here : CLICK HERE www.studentbro.in